Downloaded From : http://cbseportal.com/

This Question Paper consists of 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवं 4 मुद्रित पृष्ठाः सन्ति।

Roll No. / अनुक्रमाङ्कः

**Code No. 59/S/O**
गूढसंख्या

**Set / स्तवकः** A

# VEDA ADHYAYAN
## वेदाध्ययनम्
## (245)

Day and Date of Examination (परीक्षादिवसः दिनाङ्कश्च) ..........................................

Signature of Invigilators (निरीक्षकयोः हस्ताक्षरम्) 1. ..........................................

2. ..........................................

---

*सामान्या निर्देशाः —*

1. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः।
2. निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
3. वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।
4. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
5. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
6. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।
7. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

# VEDA ADHYAYAN

## वेदाध्ययनम्

## (245)

परीक्षासमयावधिः (Time) : होरात्रयम् (3 hrs) ] [ पूर्णाङ्काः (Full Marks) : 100

**निर्देशाः** — (i) अस्मिन् प्रश्नपत्रे [A] भागे 10, [B] भागे 10, [C] भागे 10, [D] भागे 5 इति आहत्य 35 प्रश्नाः सन्ति।

(ii) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

(iii) **सर्वे** प्रश्नाः अनिवार्याः।

**[A]** दशानां युक्तं विकल्पं चिनुत— 1×10=10

1. वेदा अपौरुषेया इति कस्य मतम्?

(क) वेदान्तिनः (ख) नैयायिकस्य

(ग) चार्वाकस्य (घ) बौद्धस्य

2. ऋग्वेदस्य भाष्यं सर्वप्रथमं कः विरचितवान्?

(क) सायणाचार्यः (ख) स्कन्दस्वामी

(ग) रङ्गरामानुजः (घ) हलायुधः

3. शुनःशेपोपाख्याने हरिश्चन्द्रः कम् उपास्य पुत्रं लब्धवान्?

(क) इन्द्रम् (ख) अग्निम्

(ग) वरुणम् (घ) अश्विनौ

4. दर्शशब्दस्यार्थः

(क) पूर्णिमा (ख) सूर्यग्रहणम्

(ग) अमावस्या (घ) चन्द्रग्रहणम्

5. संसमिद्युवसे वृषन्नग्ने — इत्यत्र वृषन्-पदस्य कः अर्थः?

(क) वृष्टेः दाता (ख) वृषभः

(ग) कामानां वर्षकः (घ) वरणेच्छुः

6. मिनीमसि द्यविद्यवि — इत्यत्र मिनीमसि-पदस्य कः अर्थः?

(क) हिंसितवन्तः (ख) अवमानितवन्तः

(ग) मननं कृतवन्तः (घ) मनसा नीतवन्तः



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

7. वरुणशापात् हरिश्चन्द्रस्य कः रोगः सञ्जातः?

(क) आन्त्रिकः (ख) मधुमेहः

(ग) ज्वरः (घ) महोदरः

8. विश्वामित्रेण पुत्ररूपेण गृहीतस्य शुनःशेपस्य किं नाम अभवत्?

(क) देवरातः (ख) आङ्गिरसः

(ग) विश्वश्रवाः (घ) सोयवसिः

9. पूरुषः इति रूपसिद्धिः केन सूत्रेण भवति?

(क) छन्दसि बहुलम् (ख) अन्येभ्योऽपि दृश्यते

(ग) अन्येषामपि दृश्यते (घ) शेश्छन्दसि बहुलम्

10. नक्षत्रियः — इत्यत्र कः प्रत्ययः?

(क) छ (ख) ठक्

(ग) ढक् (घ) घ

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत— 2×10=20

11. ऋग्वेदस्य अथर्ववेदस्य च ब्राह्मणानां नाम लिखत। 1+1

12. आनन्दतीर्थः कस्य वेदस्य भाष्यं कृतवान्? आनन्दतीर्थस्य अपरं नाम किम्? 1+1

13. हरिश्चन्द्रस्य पुत्रस्य नाम किम्? कः शुनःशेपं पोष्यपुत्ररूपेण स्वीचकार? 1+1

14. सर्वविधसोमयागस्य प्रकृतिः कः? का नाम प्रायणीयेष्टिः? 1+1

15. सूर्यसूक्तस्य कः ऋषिः, किं छन्दः, का च देवता? 2

16. छन्दसि परेऽपि इति सूत्रस्यार्थं सोदाहरणं लिखत। 2

17. निष्टर्क्य इत्यस्य लौकिकं रूपं किम्? प्रस्तुतरूपविधायकं सूत्रं च किम्? 1+1

18. पञ्चथम् इत्यत्र कः प्रत्ययः? किं चात्र प्रत्ययविधायकं सूत्रम्? 1+1

19. आतोऽटि नित्यम् इति सूत्रेण किं विधीयते? उदाहरणमेकं लिखत। 1+1

20. शेश्छन्दसि बहुलम् इति सूत्रस्य उदाहरणं लिखत। सूत्रेणानेन किं विधीयते? 1+1



Downloaded From : http://cbseportal.com/ Courtesy : NIOS

Downloaded From : http://cbseportal.com/

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त— 4×10=40

21. वशिष्ठविश्वामित्रयोः आख्यानं संक्षेपेण लिखत।

22. ब्राह्मणस्य वेदभागस्य विषये टीकां लिखत।

23. को नाम विनियोगः? विनियोगः कतिविधः, के च ते? सोदाहरणं लिखत। 1+1+2

24. चित्रं देवानामुदगादनीकम् इति मन्त्रं सम्पूर्णं लिखित्वा तस्यार्थं लिखत।

25. यमो नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्तवा उ। यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या अनु स्वाः॥
—इति मन्त्रं व्याख्यात।

26. अन्नं ह प्राण शरणं ह वासो रूपं हिरण्यं पशवो विवाहाः। सखा ह जाया कृपणं दुहिता ज्योतिर्ह पुत्रः व्योमन्॥
—प्रसङ्गमुल्लिख्य मन्त्रस्यास्य तात्पर्यं लिखत।

27. स उत्तमस्य इति सूत्रं व्याख्यात।

28. सोम्यः इति रूपं साधयत।

29. देवासः इति रूपं साधयत।

30. आङ्याजयारामुपसंख्यानम् इति वार्त्तिकं सोदाहरणं व्याख्यात।

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः — 6×5=30

31. सायणभाष्यस्य महत्त्वमालोचयत।
32. वरुणदेवतास्वरूपम् आलोचयत।
33. शुनःशेपोपाख्यानपठनेन कीदृशी नीतिशिक्षा लभ्यते इति सविस्तरमालोचयत।
34. शुनःशेपोपाख्यानपठनेन कीदृशी नीतिशिक्षा लभ्यते इति सविस्तरमालोचयत।
35. तुमर्थे सेसेनसे...... इति सूत्रं सम्पूर्णं लिखित्वा सोदाहरणं व्याख्यात।

★ ★ ★



Downloaded From : http://cbseportal.com/ Courtesy : NIOS